# १०. श्रीवेंकटेश स्तोत्रम्

वेंकटेशो वासुदेवः प्रद्युम्नोऽमितविक्रमः ।
संकर्षणोऽनिरुद्धश्च शेषाद्रिपतिरेव च ॥ १ ॥

जनार्दनः पद्मनाभो वेंकटाचलवासनः ।
सृष्टिकर्ता जगन्नाथो माधवो भक्तवत्सलः ॥ २ ॥

गोविंदो गोपतिः कृष्णः केशवो गरुडध्वजः ।
वराहो वामनश्चैव नारायण अधोक्षजः ॥ ३ ॥

श्रीधरः पुंडरीकाक्षः सर्वदेवस्तुतो हरिः ।
श्रीनृसिंहो महासिंहः सूत्राकारः पुरातनः ॥ ४ ॥

रमानाथो महीभर्ता भूधरः पुरुषोत्तमः ।
चोलपुत्रप्रियः शांतो ब्रह्मादीनां वरप्रदः ॥ ५ ॥

श्रीनिधिः सर्वभूतानां भयकृद्भयनाशनः ।
श्रीरामो रामभद्रश्च भवबंधैकमोचकः ॥ ६ ॥
भूतावासो गिरावासः श्रीनिवासः श्रियः पतिः ।
अच्युतानंतगोविंदो विष्णुर्वेंकटनायकः ॥ ७ ॥

सर्वदेवैकशरणं सर्वदेवैकदैवतम् ।
समस्त देवकवचं सर्वदेवशिखामणिः ॥ ८ ॥

इतीदं कीर्तितं यस्य विष्णोरमिततेजसः ।
त्रिकाले यः पठेन्नित्यं पापं तस्य न विद्यते ॥ ९ ॥

राजद्वारे पठेद्घोरे संग्रामे रिपुसंकटे ।
भूतसर्पपिशाचादिभयं नास्ति कदाचन ॥ १० ॥

अपुत्रो लभते पुत्रान् निर्धनो धनवान् भवेत् ।
रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बंधनात् ॥ ११ ॥

यद्यदिष्टतमं लोके तत्तत्प्राप्नोत्यसंशयः ।
ऐश्वर्यं राजसन्मानं भुक्तिमुक्तिफलप्रदम् ॥ १२ ॥

विष्णुलोकैकसोपानं सर्वदुःखैकनाशनम् ।
सर्वैश्वर्यप्रदं नॄणां सर्वमंगलकारकं ॥ १३ ॥

मायावी परमानंदं त्यक्त्वा वैकुंठमुत्तमम् ।
स्वामिपुष्करिणीतीरे रमया सह मोदते ॥ १४ ॥

कल्याणाद्भुतगात्राय कामितार्थप्रदायिने ।
श्रीमद्वेंकटनाथाय श्रीनिवासाय ते नमः ॥ १५ ॥

वेंकटाद्रिसमं स्थानं ब्रह्मांडे नास्ति किंचन ।
वेंकटेशसमो देवो न भूतो न भविष्यति ॥
एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहं ॥ १६ ॥

॥ इति श्री ब्रह्मांडपुराणे ब्रह्मनारदसंवादे श्री वेंकटेश स्तोत्रम् ॥